अभ्यास पत्र 3

विषय ः संस्कृत | कक्षा - नव | जुलाई ,2025

1 इदं चित्रं दृष्ट्वा चित्रम् च आधृत्य मञ्जूषायां प्रदत्तशब्दानाम् सहायतया पञ्चवाक्यानि रचयत—



मञ्जूषा—भारतद्वारस्य, राष्ट्रपतिभवनम्, अमरजवानज्योतिः, वृक्षाः, विशालाः, चित्रे

## 2 अधोलिखित पदयांश पठित्वा प्रश्ननानि उत्तराणि दीयताम्।

कश्चित् वनवासी एकदा ग्रामम् अगच्छत्। ग्रामगतः सः तत्र यन्त्रचालितम् अरघट्टम् दृष्टवान्। अरघट्टस्य घटिकापतत् जलं क्षेत्राणि सिञ्चति स्म। यन्त्रदर्शनेन चकितः सः नगरं प्रति प्रस्थितः। तत्र आपणगतानि वस्तूनि दृष्ट्वा अचिन्तयत्—अरे! किमेतत् सर्वं मानवनिर्मितम्? अनुपमा मानवशक्तिः। विविधा भोजनसामग्री, यन्त्रनिर्मितानि परिधानवस्त्राणि, आत्मरक्षायै शस्त्राणि, शरीरशोभायै प्रसाधन द्रव्याणि, विस्तृताः सञ्चारमार्गाः विद्युद्व्यजनानि ग्रीष्मतापहरणाय वातानुकूलनयन्त्राणि शीत निवारणाय उष्णकाणि। एतत् सर्वं दृष्ट्वा सः आश्चर्यविमूढः जातः। वृक्षमूले उपविश्य सः अवदत्—अहो कथं विज्ञानाधीनः जातः अद्यतनः मानवः। 10

**प्रश्नाः**

**(I) एकपदेन उत्तरत।** (एक पद में उत्तर दीजिए। Answer in one word only.)

(*i*) ग्रामगतः वनवासी किं दृष्टवान्?

(*ii*) अनुपमा का?

(*iii*) कः एकदा ग्रामम् अगच्छत्?

(*iv*) ग्रीष्मतापहरणाय कानि सन्ति?

**(II) पूर्णवाक्येन उत्तरत।** (पूर्ण वाक्य में उत्तर दीजिए। Answer in a complete sentence.)

(*i*) किम् दृष्ट्वा वनवासी आश्चर्यविमूढः जातः? (*ii*) यन्त्रदर्शनेन चकितः कः अभवत्?

**(III) उपरिलिखितस्य अनुच्छेदस्य कृते समुचितं शीर्षकं चित्वा लिखत।** (इस अनुच्छेद का उपयुक्त शीर्षक चुनकर लिखिए। Select an appropriate title for this passage.) 2

(क) विज्ञानाधीनः मानवः (ख) विज्ञानाधीनः अद्यतनः मानवः

(ग) अद्यतनः मानवः (घ) मानवः

**(IV) भाषिककार्यम्।** (भाषा संबंधी कार्य। Work of language.)

(*i*) 'विस्तृताः सञ्चार मार्गाः' अनयोः पदयोः विशेषणपदं किम्?

(क) सञ्चाराः (ख) मार्गाः (ग) सञ्चारमार्गाः (घ) विस्तृताः

(*ii*) शीतनिवारणाय उष्णकानि भवन्ति? अस्मिन् वाक्ये कर्तृपदं किम्?

(क) भवन्ति (ख) उष्णकानि (ग) शीतानि (घ) शीतनिवारणाय

(*iii*) 'ग्रामगतः' इति पदं कस्मै आगतम्?

(क) वनवासिने (ख) नगरवासिने (ग) ग्रामाय (घ) जनाय